योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १४२

मुनिरुवाच ।

वर्तमाने तदा तस्मिन्कष्टे संभ्रान्तसंभ्रमे ।

उह्यमानोऽहमत्यन्तं खेदमभ्यागतोऽभवम् ।। १

अचिन्तयं तत्स्वप्नोऽयं परस्य हृदये मम ।

तदतः परिनिर्वामि दुःखं पश्यामि किं मुधा ।। २

व्याध उवाच ।

किंस्वित्स्यात्स्वप्न इत्येव किल संदेहशान्तये ।

प्रविष्टो हृदयं तस्य किं तं निर्णीतवानसि ।। ३

किमेतद्भवतां दृष्टं हृदये क्व महार्णवः ।

जठरे कल्पवातः किं हृदि कल्पानलः कथम् ।। ४

द्यौः क्ष्मा वायुराकाशं पर्वताः सरितो दिशः ।

कथं हृदि जगन्नाम कथयेति यथास्थितम् ।। ५

मुनिरुवाच ।

अकारणत्वात्सर्गादावेवानुत्पादतः स्फुटात् ।

अज्ञातौ सर्गशब्दार्थावेव न स्तो मनागपि ।। ६

तच्चैतौ सर्वशब्दार्थौ त्वज्ञातौ परमात्मनि ।

यतस्तत्पदमज्ञानज्ञानात्मकमनामयम् ।। ७

अतः सुभग सिद्धान्ते त्वत्पक्षे बोधमागते ।

मौर्ख्यशान्तावनाद्यन्ते पदे परमपावने ।। ८

वच्मीदं मूढसंवित्तौ यदिद तन्न वेद्म्यहम् ।

वस्त्ववस्तुजमाभातं बोधमात्रमिदं ततम् ।। ९

क्व शरीरं क्व हृदयं क्व स्वप्नः क्व जलादि च ।

क्व बोधो बोधविच्छित्तिः क्व जन्ममरणादि च ।।१०

स्वच्छं चिन्मात्रमस्तीह तन्नाम यदपेक्षया ।

स्थूलमेव खमप्यद्रिरणूनां निकटे यथा ।। ११

स्वभावात्स चिदाकाशः किंचिच्चेतति चिन्तया ।

खमेव वपुराकाशं यत्तद्वेत्ति जगत्तया ।। १२

यथा स्वप्ने पुरतया चिदेवाभाति केवला ।

न तु किंचित्पुराद्येवं जगच्चिन्मात्रमेव खे ।। १३

इदं शान्तमनाभातमनन्यन्नैतदात्मनि ।

चिति दृशौ तमसि खे चक्रकादीव भाति ते ।। १४

अस्माकं तु न चाभानं न चासन्न च सन्न खम् ।

अनाकारमनाद्यन्तमेकं चिद्व्योम केवलम् ।। १५

भात्यकारणकं स्वप्ने शुद्धौ द्रष्टैव केवलः ।

तेनात्र कारणाभावो न द्रष्टास्ति न दर्शनम् ।। १६

शुद्धं किमपि तद्भाति स्वानुभूतमपि स्फुटम् ।

यदवाच्यमनाद्यन्तमेकं द्वैतैक्यवर्जितम् ।। १७

एकः कालो यथा कल्पः प्रकाशश्चोभयात्मकः ।

बीजं वा फलपुष्पान्तं ब्रह्म सर्वात्मकं तथा ।। १८

यदन्यस्य महत्कुड्य तदन्यस्यामलं नभः ।

दृष्टमेतत्स्थिरस्वप्नसंकल्पभ्रमभूमिषु ।। १९

स्वच्छं तदा तदात्मैकं भाति चिन्मात्र खं यथा ।

स्वप्ने जागृतिवत्तद्वज्जाग्रत्स्वप्नेऽपि नान्यथा ।। २०

अदृश्ये पवने यद्वददृश्यं सौरभं स्थितम् ।

चिन्मात्रेऽप्रतिघे तद्वज्जगदप्रतिघं स्थितम् ।। २१

समस्तमननत्यागे योऽसि सोऽसि निरामयः ।

बहिरन्तरनन्तात्मा सुस्थितोऽपि निरन्तरम् ।। २२

व्याध उवाच ।

भगवन्प्राक्तनं कर्म केषामिह हि विद्यते ।

केषां न विद्यते तद्वद्विनापि भवतः कथम् ।। २३

मुनिरुवाच ।

सर्गादिषु स्वयं भान्ति ब्रह्माद्या ये स्वयंभुवः ।

विज्ञप्तिमात्रदेहास्ते न तेषां जन्मकर्मणी ।। २४

तेषामस्ति न संसारो न द्वैतं न च कल्पनाः ।

विशुद्धज्ञानदेहास्ते सर्वात्मानः सदा स्थिताः ।। २५

सर्गादौ प्राक्तनं कर्म विद्यते नेह कस्यचित् ।

सर्गादौ सर्गरूपेण ब्रह्मैवेत्थं विजृम्भते ।। २६

यथा ब्रह्मादयो भान्ति सर्गादौ ब्रह्मरूपिणः ।

भान्ति जीवास्तथान्येऽपि शतशोऽथ सहस्रशः ।।९७

किंतु ये ब्रह्मणोऽन्यत्वं बुध्यन्ते सात्त्विकोद्भवाः ।

अबोधा ये त्वचिदाख्यं बुद्ध्वा द्वैतमिदं स्वयम् ।। २८

तेषामुत्तरकालं तत्कर्मभिर्जन्म दृश्यते ।

स्वयमेव तथा भूतैस्तैरवस्तुत्वमाश्रितम् ।। २९

यैस्तु न ब्रह्मणोऽन्यत्वं बुद्धं बोधमहात्मनि ।

निरवद्यास्त एतेऽत्र ब्रह्मविष्णुहरादयः ।। ३०

सर्वात्म संविदोऽच्छत्वं ब्रह्मात्मन्येव संस्थितम् ।

तत्क्वचिज्जीववद्भानं स्वयमात्मनि पश्यति ।। ३१

यत्र वेत्ति तु जीवत्वं तत्राविद्येति तिष्ठति ।

तत्र संसृतिनाम्नात्मा धत्ते रूपं तथास्थितम् ।। ३२

स्वयमेव हि कालेन बुद्ध्वा स्वं रूपमात्मनः ।

स्वयमेव स्वरूपस्थं ब्रह्मैव भवति स्वयम् ।। ३३

यथा द्रवत्वादम्ब्वन्तरेति चावर्ततामिव ।

ब्रह्म चित्त्वात्तथैतीव सर्गतामस्य सर्गकम् ।। ३४

ब्रह्मभानमयं सर्गो न स्वप्नो न च जागरः ।

कस्य कान्यत्र कर्माणि कीदृशानि कियन्ति वा ।।३५

वस्तुतः कर्म नास्त्येव नाविद्यास्ति न सर्गधीः ।

स्वसंवेदनतः सर्वमसदेव प्रवर्तते ।। ३६

ब्रह्मैव सर्गो भूतात्मा कर्म जन्मेति कल्पनाः ।

स्वयं कुर्वदिदं भाति विभुत्वात्कल्पितार्थभाक् ।। ३७

न संभवति जीवस्य सर्गादौ कर्म कस्यचित् ।

पश्चात्स्वकर्म निर्माय भुङ्क्ते कल्पनया स चित् ।। ३८

जलावर्तस्य को देहः कानि कर्माणि चोच्यताम् ।

यथाम्बुमात्रमावर्तो ब्रह्ममात्रं तथा जगत् ।। ३९

यथा स्वप्नेषु दृष्टानां न प्राक्कर्म नृणां भवेत् ।

आदिसर्गेषु जीवानां तथा चिन्मात्ररूपिणाम् ।। ४०

सर्गे सर्गतया रूढे भवेत्प्राक्कर्मकल्पना ।

पश्चाज्जीवा भ्रमन्तीमे कर्मपाशवशीकृताः ।। ४१

सर्ग एव न सर्गोऽयं ब्रह्मेत्थं किल तिष्ठति ।

यत्र तत्र क्व कर्माणि कानि वा कस्य तानि वा ।। ४२

अपरिज्ञानमात्रं यत्स्वयं वै परमात्मनः ।

तदेतत्कर्म बन्धाय तत्तज्ज्ञस्योपशाम्यति ।। ४३

यावद्यावत्परिज्ञानं पण्डितस्य प्रवर्तते ।

तावत्तावत्तदैवास्य कर्म शाम्यति बन्धनम् ।। ४४

यन्नाम किल नास्त्येव तच्छान्तौ का कदर्थना ।

परमार्थादृते बन्धः किंचिन्नाम न विद्यते ।। ४५

तावन्माया भवभयकरी पण्डितत्वं न याव-

त्तत्पाण्डित्यं पतसि न पुनर्येन संसारचक्रे ।

यत्नं कुर्यादविरतमतः पण्डितत्वेऽमलात्म-

ज्ञानोदारे भयमितरथा नैव वः शान्तिमेति ।। ४६

इत्यार्षे श्रीवासिष्ठमहा० वा० दे० मो० नि० उ० अ० वि- शवो- कर्मनिर्णयो नाम द्विचत्वारिंशदधिकशततमः सर्गः ।।